# tArAkarpUrastotram

# તારાકર્પૂરસ્તોત્રમ્

## Document Information

Text title : tArAkarpUrastotram

File name : tArAkarpUrastotram.itx

Category : devii, devI, dashamahAvidyA, AratI

Location : doc_devii

Transliterated by : Yash Khasbage

Proofread by : Yash Khasbage, NA

Latest update : June 19, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 19, 2020

*sanskritdocuments.org*

tArAkarpUrastotram

# તારાકર્પૂરસ્તોત્રમ્

ૐ નમસ્તારિણ્યૈ ।

શ્રીકણ્ઠામૃતકેશવર્ણઘટિતં ચન્દ્રાર્ધચૂડોજ્જ્વલં
બીજં યત્પરમં ગુણત્રયમયં કામપ્રદં મુક્તિદમ્ ।
માતઃ ! શઙ્કરવલ્લભે ! પ્રતિદિનં ધ્યાયન્તિ યે યે સદા
તે તે યાન્તિ ચિદાત્મકં હરિહરબ્રહ્માદિસામ્યં મુદા ॥ ૧॥

વ્યોમાર્ણં વામનેત્રાન્વિતમનલયુતં બિન્દુચન્દ્રાર્ધયુક્તં
બીજં તે ગુહ્યમેતત્ત્રિભુવનજનનિ ! ત્રિક્ષણે યે જપન્તિ । var ત્ર્યક્ષરં યે જપન્તિ
તેષાં વક્ત્રારવિન્દે વિહરતિ મધુરા ગદ્યપદ્યાવલી ગી-
ર્માતશ્ચન્દ્રાર્ધચૂડે ! સકલભયહરે ! સિદ્ધિભાજાં નરાણામ્ ॥ ૨॥

શુક્રાર્ણં પૂતનાસ્થં કલિતશશિકલાબિન્દુભૂષં સવહ્નિ
ભ્રાજદ્વામાક્ષિયુક્તં જનનિ ! તવ વધૂબીજમેતજ્જપન્તિ ।
તે તે લોલેક્ષણાનાં વિગલિતરસનાપીનવક્ષોજવાસઃ
કેશાનાં ચિત્તમાશુ સ્મરહરમહિલે ! મોહયન્તિ પ્રકામમ્ ॥ ૩॥

ઈશાનં વામકર્ણોલ્લસિતશશિકલાબિન્દુયુક્તં સુગુહ્યં
"બીજં માતસ્ત્વદીયં" યદિ જપતિ જનો વારમેકં જડાત્મા । var બીજં કૂર્ચાખ્યમન્યદ્
ચઞ્ચત્પઞ્ચાશદુગ્રગ્રથિતનરશિરોમાલિકાક્રાન્તકણ્ઠે !
માતઃ શૈલેન્દ્રપુત્રિ ! ત્રિભુવનમપિ સ ક્ષોભયત્યેવ શીઘ્રમ્ ॥ ૪॥

પશ્ચાદસ્ત્રં તદન્યત્પુરહરમહિલે! બીજમત્યન્તગુહ્યં
ભાલોદ્યત્પઞ્ચમુદ્રે પ્રકટવિકટદંષ્ટ્રોગ્રવક્ત્રારવિન્દે ।
નિત્યં યે ભાવયન્તિ પ્રતિદિનમમલે! ઘોરરૂપાટ્ટહાસે!
તે નૂનં ભાવયન્તિ ત્રિજગદઘહરે ! ચક્રવદ્વિશ્વમેતત્ ॥ ૫॥

માયાસ્ત્રીકૂર્ચબીજૈર્નવતપનહરિત્સાર્ધચન્દ્રાંશુવર્ણે
માતર્નીલાખ્યમેતત્તવ મનુમનિશં યે પ્રકામં જપન્તિ ।

વિત્તે વિત્તેશતુલ્યાઃ શુકગુરુસદૃશાસ્તર્કકાવ્યાગમાદૌ
તે તે નીલામ્બુદાલીરુચિરુચિરતનો! કામતુલ્યા ભવન્તિ ॥ ૬॥

ભવાન્યેભિર્બીજૈર્હિમગિરિસુતે ! ચાસ્ત્રસહિતૈ-
ર્નિગૂઢં યે માતર્મનુમનુજપન્ત્યેકજટિલે!।
ત્રિયામાનાથાર્ધપ્રવિલસિતભાલે ! ત્રિનયને!
ગૃહે તેષાં નિત્યં નિવસતિ સદા સિન્ધુતનયા ॥ ૭॥

અમીભિર્બીજૈસ્તે પ્રણવસહિતૈઃ શૈલતનયે !
નિજસ્વાન્તે ચાસ્ત્રં પરિજપતિ પઞ્ચાક્ષરમિતિ । 5 akSharas ૐ હ્રીં સ્ત્રીં હૂં ફટ્
સ સાક્ષાત્તે ન્યાસી સ તુ પુરહરોઽસૌ મુરહરઃ
સ ધાતા યં મુક્તો ભવતિ હિ ચિદાનન્દરસિકે ! ॥ ૮॥

શવાસીનાં કણ્ઠાકલિતનૃકરોટીં કરલસત્
કપાલાસિશ્યામોત્પલરુચિરકર્ત્રીં ત્રિનયનામ્ ।
નવામ્ભોદશ્યામાન્વિકટરદભીમાન્પૃથુકુચાં
સદૈવ ત્વાં ધ્યાયન્ જનનિ! ચ જડો વાક્પતિસમઃ ॥ ૯॥

તટે નદ્યાઃ સિન્ધોર્ગિરિશિરસિ માલૂરગહને
શ્મશાને ગોષ્ઠે વા ગિરિશભવને શૂન્યસદને ।
હવિષ્યાશી લક્ષં પ્રજપતિ વશી ભાવનપરઃ
સ સર્વજ્ઞો વાગ્મી ભવતિ સુઘનાપીનજઘને! ॥ ૧૦॥

મુદા માતઃ શુદ્ધોદકરુચિરગન્ધાઢ્યસલિલૈઃ
સ્વયમ્ભૂપુષ્પસ્રક્કુલતનુભગચ્છાલન જલૈઃ । var ક્ષાલનં
શિવે ! ત્વાં સન્ધ્યાયન્ હરમહિષિ ! સન્તર્પયતિ યઃ
સ દૈવસ્ત્રીવૃન્દં વશયતિ સ વિદ્યાધરપતિઃ ॥ ૧૧॥

જપાપુષ્પૈર્બિલ્વૈર્મરુબકુલવર્ગૈશ્ચ કુસુમૈઃ
સુગન્ધૈઃ કર્પૂરૈરગરુસહિતૈર્ધૂપનિકરૈઃ ।
પ્રદીપૈરુજ્જ્વાલૈર્ઘૃતરચિતનૈવેદ્યનિકરૈ-
સ્તવાર્ચાં યઃ કુર્યાત્સ ભવતિ કવીન્દ્રઃ ક્ષિતિતલે ॥ ૧૨॥

સદૂર્વાભિઃ પદ્મૈસ્ત્રિમધુલલિતૈઃ શ્રીફલદલૈ-
ર્ઘૃતૈર્ગવ્યૈ રક્તૈઃ સુકુલભગલિઙ્ગામૃતરસૈઃ ।
ત્રિકોણે કુણ્ડે યો હુતવહમખે હોમવિધિના
જુહોતિ ત્વાં માતઃ! સ ભવતિ કવીન્દ્રઃ ક્ષિતિપતિઃ ॥ ૧૩॥

નિશીથે કલ્યાણિ ! પ્રમુદિતમના યઃ પિતૃવને
 બલિં તે મેષાદ્યૈઃ સનરમહિષૈર્વા પરિચરેત્ ।
સ રાજાનં ક્ષિપ્રં વશયતિ મૃગાક્ષીસમુદયં
 ત્રિલોકીં વા ભૂમૌ સ ભવતિ જનઃ સત્કવિવરઃ ॥ ૧૪॥

મહાપૂજાં માતસ્તવ વિતનુતે યસ્તુ મધુના
 તથા માંસૈર્મત્સ્યૈર્વિવિધનવમુદ્રાદિભિરપિ ।
વરસ્ત્રીભિઃ સાર્ધં નિધુવનવિનોદેન મુદિતો
 નિશીથે સંસારાત્સ ભવતિ વિમુક્તઃ પશુભયાત્ ॥ ૧૫॥

ત્રિકોણે પીઠે ત્વાં વરનિધુવનાસઙ્ગહૃદયાં
 મહાકાલેનોદ્યત્પુલકનિચયાં સ્મેરવદનામ્ ।
સ્વયં નક્તં કાન્તારતિરસસમાસક્તહૃદયો
 મનુષ્યો યો ધ્યાયેદ્ભવતિ શિવતુલ્યઃ સ ધરણૌ ॥ ૧૬॥

સમુત્તુઙ્ગાપીનસ્તનજઘનરાજત્કુલવધૂ-
 વ્યવાયવ્યાસક્તો જપતિ તવ ભક્તો યદિ મનુમ્ ।
ગલદ્વાસઃકેશો જનનિ ! મનુજો મેદિનિતલે
 સ સિદ્ધીશઃ શક્ત્યા જયતિ સુચિરં સર્વસુજનમ્ ॥ ૧૭॥

ભવાનિ ! શ્રીર્માતર્નિજગલિતવીર્યાપ્તચિકુર-
 મથ પ્રેમ્ણા લબ્ધ્વા વચનભુવનેશીયુતમનુમ્ ।
સમુચ્ચાર્ય ક્ષોણીતનયદિવસે પ્રેતસદને
 સ દીર્ઘાયુર્વાગ્મી ભવતિ શતહોમાત્ક્ષિતિતલે ॥ ૧૮॥

અજસ્રં યો મન્ત્રં તવ જપતિ ભૂમીધરસુતે
 વિચિન્ત્યાગ્રે માતઃ ! કુસુમલલિતં મારભવનમ્ ।
ધરણ્યાં કન્દર્પપ્રતિમતનુભૂતઃ સ સકલા-
 ન્નિજેષ્ટાનાપ્નોતિ પ્રવિશતિ મુદા તારિણિપદમ્ ॥ ૧૯॥

તમોગ્રસ્તે ચન્દ્રે યદિ જપતિ લોકસ્તવ મનું
 નવમ્યાં વા માતર્ધરણિધરકન્યે ! વિતનુતે ।
તથા સૂર્યે પૃથ્વીવલયતિલકઃ કાવ્યતટિની
 પયોધિઃ સિદ્ધીનાં ભવતિ ભવનં સર્વવિદિતઃ ॥ ૨૦॥

સદા પાદામ્ભોજે ભજતુ હૃદયં ભૃઙ્ગ ઇવ મે

સદા પાણિદ્વન્દ્વં પરિચરતુ કર્ણસ્તવ કથામ્ ।
શ‍ૃણોતુ ત્વકીર્તિં હરમહિષિ ! ગીર્ગાયતુ સદા
સદા દૃષ્ટિર્ભૂયાદ્ભવદનુચરાલોકનપરા ॥ ૨૧॥

કદાકાલે શૈલેશ્વરતનુભવે ! પાદયુગલં
મુદા દ્રક્ષ્યે બ્રહ્મપ્રમુખવિબુધાનાં પરિણુતમ્ ।
કૃપાપારાવારે ! ભવજનનભીતૈકશરણે!
શરણ્યે ! કારુણ્યં મયિ વિતર દીને ભગવતિ ! ॥ ૨૨॥

સદૈવ સ્તોત્રં યઃ પઠતિ મુદિતઃ સાધકવરો
ન દારિદ્ર્યં તસ્ય પ્રભવતિ કદાચિત્ક્ષિતિતલે ।
ત્રિવર્ગો હસ્તે સ્યાજ્જગદખિલમેતચ્ચ વશગં
ચિરં જીવન્નન્તે જનનિ ! લભતે મોક્ષપદવીમ્ ॥ ૨૩॥

ઇદં સ્તોત્રં માતઃ પ્રપઠતિ દિવારાત્રિમનિશં
સ સર્વજ્ઞો યોગીશ્વરનિકરચૂડામણિસમે ! ।
જડોઽપિ ત્વદ્રૂપં જપતિ યદિ સઞ્ચિન્ત્ય મનસા
ત્વદગ્રે ભૂયોચ્ચૈઃ ક્ષિતિપતિસમાનઃ ક્ષિતિતલે ॥ ૨૪॥

મહાપુણ્યં ધન્યં સકલપુરુષાર્થૈકનિલયં
યશસ્યં ચાયુષ્યં સતતભવતાપાપહમિદમ્ ।
રહસ્યં પ્રાકાશ્યન્ન હિ ખલુ કદાચિત્પશુજને
પઠેત્પૂજાકાલે જનનિ ! લભતે મોક્ષપદવીમ્ ॥ ૨૫॥

॥ ઇતિ શ્રીફેત્કારીતન્ત્રે તારાકર્પૂરસ્તોત્રમ્ ॥

Encoded and posted by Yash Khasbage

---

*tArAkarpUrastotram*

pdf was typeset on June 19, 2020

Please send corrections to *sanskrit@cheerful.com*